परं-अकं-सेट्।) अद्द अचीकणत् अचकाणत्। कणति भीतः। इति दुर्गादासः॥

कण, म गतौ। इति कविकल्पद्रुमः। (भ्वां-परं-सक्-सेट्-घटादि।) म कणयति। इति दुर्गादासः॥

कण, क निमीलने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) निमीलनं पक्ष्मावरणम्। क काणयति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः। इति दुर्गादासः॥

कणः, पुं, (कणति अतिसूक्ष्मत्वं गच्छति। कण+पचाद्यच्।) अतिसूक्ष्मः। ("आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः"।
इति शान्तिशतकम् ५॥) धान्यांशः। इत्यमरः। ३।१।६२॥ (यथा, मनु।११।९२।
"कणान् वा भक्षयेदब्दं पिन्याकं वा सकृन्निशि"॥)
तस्य स्त्रीलिङ्गे कणी कणिका। वनजीरकः। इति राजनिर्घण्टः॥

कणगुग्गुलुः, पुं, (कणश्चासौ गुग्गुलुश्चेति।) गुग्गुलुप्रभेदः। तत्पर्य्यायः। गन्धराजः २ स्वर्णकणः ३ सुवर्णः ४ कनकः ५ वंशपीतः ६ सुरभिः ७ पलङ्कषः ८॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वातशूलगुल्मोदराध्मानकफनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

कणजीरः, पुं, (कणश्चासौ जीरश्चेति नित्यकर्म्मधारयः।) श्वेतजीरकः। इति राजनिर्घण्टः। (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः॥)

कणजीरकं, क्ली, (कणं क्षुद्रं जीरकम्। कणजीर+स्वार्थे कन्।) क्षुद्रजीरकम्। तत्पर्य्यायः। हृद्यगन्धि २ सुगन्धम् ३। इति रत्नमाला शब्दचन्द्रिका च॥

कणभक्षकः, पुं, (कणान् भक्षयति भक्षति वा। कण+भक्ष+ण्वुल्।) भारिटपक्षी। इति राजनिर्घण्टः॥

कणलाभः, पुं, (कणानां लाभो यस्मात् सः। पेषणसाधनयन्त्रविशेषः स सादृश्येनास्त्यस्य। अर्श-आदिभ्यः अच्।) आवर्त्तः। इति त्रिकाण्डशेषः। जलेर घूर्णा इति भाषा॥

कणा, स्त्री, (कण+स्त्रियां टाप्।) जीरकम्। कुम्भीरमक्षिका। पिप्पली। इति मेदिनी॥
("द्राक्षां कणां पञ्चमूलं तृणाख्यञ्च पचेज्जले।
तेन क्षीरं शृतं शीतं पिबेत् समधुशर्करम्"॥
इति पित्तकासचिकित्सायां वाभटेनोक्तम्।॥)
श्वेतजीरकम्। इति राजनिर्घण्टः॥ ("कणा स्याद्दीर्घजीरकः"॥ इति भावप्रकाशः॥ * ॥) अल्पम्। यथा,—
"कदलीफलमध्यस्थं कणामात्रमपक्वकम्"।
इति तिथ्यादितत्त्वम्॥

कणाटीनः, पुं, (कणाय अटतीति। कण+अट+इनन् दीर्घत्वञ्च पृषोदरादित्वात्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

कणाटीरः, पुं, (कणाय अटति। कण+अट+ईरन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणाटीरकः, पुं, (कणाटीर+स्वार्थे कन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणादः, पुं, (कणं अत्ति भक्षयति। कण अद+कर्म्मणि उपपदे अण्।) स्वनामख्यातमुनिविशेषः। तत्पर्य्यायः। काश्यपः २। इति त्रिकाण्डशेषः॥ स च वैशेषिकदर्शनकर्त्ता। स्वर्णकारः। कलादो रुक्मकारक इत्यमरोपरि कणाद इत्यपि पाठः। इति सारसुन्दरी॥

कणिकः, पुं, (कणैव इति स्वार्थे कन् अत इत्वम्।) कणा। शत्रुः। नीराजनविधिः। इति सारस्वतः॥ शुष्कगोधूमचूर्णम्। इति राजनिर्घण्टः॥ (कणा विद्यतेऽस्य अस्त्यर्थे ठन्। स्वार्थे ठन् वा। "नाभेरभूत् स्वकणिकाद् वटवन्महाब्जं" इति भागवतम्।७।९।३३॥ धृतराष्ट्रमन्त्रिविशेषः। यथा महाभारते।१। सम्भवपर्व्वणि १४१।२।
"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम्।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः"॥)

कणिका, स्त्री, (कणाः सन्त्यस्याः। "अत इनिठनाविति ठन्" ५।२।११५। कणति स्थूलरूपात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः। पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च।) अत्यन्तसूक्ष्मवस्तु। अग्निमन्थवृक्षः। इति मेदिनी॥ कणा। तण्डुलविशेषः। इत्यमरटीकायां रायमुकुटः॥ (जलादीनां सूक्ष्मांशः। यथा, मेघदूते ९९।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकै र्मालतीनाम्"॥)

कणितं, क्ली, (कण आर्त्तनादे+भावे क्तः।) पीड़ितानां शब्दः। इति हेमचन्द्रः॥

कणिशं, क्ली, (कणो विद्यतेऽस्य इति इनिः तं श्यति। कणि+शो+कः। यद्वा कणिनः शेरतेऽस्मिन्। कणिन्+शी+डः। कणाः सन्त्यस्य इत्यमरटीकाकृत्।) शस्यमञ्जरी। इत्यमरः।२।९।।२१। धान्यादिर शिष इति भाषा॥

कणी, स्त्री, (कण+स्त्रियां ङीप् गौरादित्वात् ङीष् वा।) कणिका। इत्यमरटीकायां भरतः॥

कणीकं, त्रि, (कण+ईकन्।) अल्पम्। इत्युणादिकोषः॥

कणीयः, [स्] त्रि, (कण+ईयसुन्।) अत्यल्पम्। इत्यमरः॥ कनिष्ठम्। इति तट्टीका॥ (यथा हठयोगदीपिकायां।२।१२। "कणीयसि भवेत् स्वेदः कम्पो भवति मध्यमे"॥)

कणेरः पुं, (कण+एरप्रत्ययः।) कर्णिकारवृक्षः। इत्युणादिकोषः॥

कणेरा, स्त्री, (कण+एरष्टाप् च।) वेश्या। हस्तिनी। इत्युणादिकोषः॥

कणेरुः स्त्री, (कण+एरु।) वेश्या। करिणी। कर्णिकारवृक्षे पुं। इति मेदिनी॥

कण्टकः, पुं, क्ली, (कण्टति इति कटि ण्वुल्। अर्द्धर्चादि पां २।४।३१।) क्षुद्रशत्रुः। (यथा विष्णुपुराणे १।१९।३१। "प्रह्लादः कथ्यतां सम्यक् तथा कण्टकशोधने"॥) मत्स्याद्यस्थि। नैयायिकादिदोषोक्तिः। रोमाञ्चः। द्रुमाङ्गम्। इति मेदिनी॥ काँटा इति भाषा॥ (तथा चोक्तं चाणक्यशतके २२।
"उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत्।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम्"॥)
केन्द्रम्। इति दीपिका॥

कण्टकः, पुं, (कटि+ण्वुल्।) सूच्यग्रम्। क्षुद्रशत्रुः। (यथा, मनुः।९।२५२।
"सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्"॥)
लोमहर्षः। इत्यमरः ३।५।३२॥ कर्म्मस्थानम्। दोषः। इति जटाधरः॥ मकरः। इति विश्वः॥ वेणुः। इति हेमचन्द्रः॥ (लोकोपद्रवकारी। यथा, भागवते।३।१८।२३।
"अन्वेषन्नप्रतिरथो लोकानटति कण्टकः"॥)

कण्टकद्रुमः, पुं, (कण्टकप्रधानो द्रुमः। कण्टकैराचितोद्रुमो वा।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (यथा मृच्छकटिके।१४०।४।
"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः"॥
"दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः"।
इति भागवतम्।७।५।१७॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः॥)

कण्टकप्रावृता, स्त्री, (कण्टकैः प्रावृता व्याप्ता। कण्टक+प्र+आ+वृ+कर्म्मणि क्त+टाप्।) गृहकन्या। इति राजनिर्घण्टः। घृतकुमारी इति भाषा॥

कण्टकफलः पुं, (कण्टकैराचितं व्याप्तं फलं यस्य। शाकपार्थिवादिवत् मध्यपदलोपी समासः।) पनसवृक्षः। इत्यमरटीकायां भरतः॥ गोक्षुरवृक्षः। इति रत्नमाला॥ (अस्य गुणादयः कण्टाफलशब्दे ज्ञेयाः॥)

कण्टकवृन्ताकी, स्त्री, (कण्टकाचिता वृन्ताकी। शाकपार्थिवादित्वात् मध्यपदलोपश्च।) वार्त्ताकी। इति राजनिर्घण्टः॥

कण्टकश्रेणी, स्त्री, (कण्टकानां श्रेणिर्यत्र। श्रेणी यस्यां वा।) कण्टकारी। इति शब्दचन्द्रिका॥

कण्टकागारः, पुं, (कण्टका आगारो यस्य। यद्वा कण्टकं आगिरति। आ+गॄ+अच्।) सरटजन्तुः। इति राजनिर्घण्टः॥

कण्टकाढ्यः, पुं, (कण्टकैराढ्यः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

कण्टकारिका, स्त्री, (कण्टकान् इयर्त्ति ऋच्छति वा कण्टक+ऋ+कर्त्तरि+ण्वुल्। स्त्रियां टाप् इत्वं च। यद्वा कण्टकं ऋच्छति+ऋ कर्म्मण्यण् ततः कन् च ततः प्राग्वत्। तत्फले तु अणि कृते हरीतक्यादित्वात् लुक्।) स्वनामख्यातक्षुद्रवृक्षः। तत्पर्य्यायः। निदिग्धिका २ स्पृशी ३ व्याघ्री ४ बृहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुष्पर्शा ९ राष्ट्रिका १०। इत्यमरः॥ धनाक्रान्ता ११ भण्टाकी १२ सिंही १३ धावनिका १४। इति रत्नमाला॥ कण्टकारी १५ कण्टकिनी १६ दुष्प्रधर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बहुकण्टा २१ क्षुद्रफला २२ कण्टा-